श्री स्कंद स्तोत्रं

श्री स्कंद स्तोत्रं (महाभारते)

मार्कंडेय उवाच |
आग्नेयश्चैव स्कंदश्च दीप्तकीर्तिरनामयः |
मयूरकेतुर्धर्मात्मा भूतेशो महिषार्दनः || 1 ||

कामजित्कामदः कांतः सत्यवाग्भुवनेश्वरः |
शिशुः शीघ्रः शुचिश्चंडो दीप्तवर्णः शुभाननः || 2 ||

अमोघस्त्वनघो रौद्रः प्रियश्चंद्राननस्तथा |
दीप्तशक्तिः प्रशांतात्मा भद्रकुक्कुटमोहनः || 3 ||

षष्ठीप्रियश्च धर्मात्मा पवित्रो मातृवत्सलः |
कन्याभर्ता विभक्तश्च स्वाहेयो रेवतीसुतः || 4 ||

प्रभुर्नेता विशाखश्च नैगमेयः सुदुश्चरः |
सुव्रतो ललितश्चैव बालक्रीडनकप्रियः || 5 ||

खचारी ब्रह्मचारी च शूरः शरवणोद्भवः |
विश्वामित्रप्रियश्चैव देवसेनाप्रियस्तथा |
वासुदेवप्रियश्चैव प्रियः प्रियकृदेव तु || 6 ||

नामान्येतानि दिव्यानि कार्तिकेयस्य यः पठेत् |
स्वर्गं कीर्तिं धनं चैव स लभेन्नात्र संशयः || 7 ||

स्तोष्यामि देवैर्ऋषिभिश्च जुष्टं
शक्त्या गुहं नामभिरप्रमेयं |
षडाननं शक्तिधरं सुवीरं
निबोध चैतानि कुरुप्रवीर || 8 ||

ब्रह्मण्यो वै ब्रह्मजो ब्रह्मविच्च
ब्रह्मेशयो ब्रह्मवतां वरिष्ठः |
ब्रह्मप्रियो ब्राह्मणसर्वमंत्री त्वं
ब्रह्मणां ब्राह्मणानां च नेता || 9 ||

स्वाहा स्वधा त्वं परमं पवित्रं
मंत्रस्तुतस्त्वं प्रथितः षडर्चिः |
संवत्सरस्त्वमृतवश्च षड्वै
मासार्धमासाश्च दिनं दिशश्च || 10 ||

त्वं पुष्कराक्षस्त्वरविंदवक्त्रः
सहस्रचक्षोऽसि सहस्रबाहुः |
त्वं लोकपालः परमं हविश्च
त्वं भावनः सर्वसुरासुराणां || 11 ||

त्वमेव सेनाधिपतिः प्रचंडः
प्रभुर्विभुश्चाप्यथ शक्रजेता |
सहस्रभूस्त्वं धरणी त्वमेव
सहस्रतुष्टिश्च सहस्रभुक्च || 12 ||

सहस्रशीर्षस्त्वमनंतरूपः
सहस्रपात्त्वं दशशक्तिधारी |
गंगासुतस्त्वं स्वमतेन देव
स्वाहामहीकृत्तिकानां तथैव || 13 ||

त्वं क्रीडसे षण्मुख कुक्कुटेन
यथेष्टनानाविधकामरूपी |
दीक्षाऽसि सोमो मरुतः सदैव
धर्मोऽसि वायुरचलेंद्र इंद्रः || 14 ||

सनातनानामपि शाश्वतस्त्वं
प्रभुः प्रभूणामपि चोग्रधन्वा |
ऋतस्य कर्ता दितिजांतकस्त्वं
जेता रिपूणां प्रवरः सुराणां || 15 ||

सूक्ष्मं तपस्तत्परमं त्वमेव
परावरज्ञोऽसि परावरस्त्वं |
धर्मस्य कामस्य परस्य चैव
त्वत्तेजसा कृत्स्नमिदं महात्मन् || 16 ||

व्याप्तं जगत्सर्वसुरप्रवीर
शक्त्या मया संस्तुत लोकनाथ |
नमोऽस्तु ते द्वादशनेत्रबाहो
अतः परं वेद्मि गतिं न तेऽहं || 17 ||

स्कंदस्य य इदं विप्रः पठेज्जन्म समाहितः |
श्रावयेद्ब्राह्मणेभ्यो यः शृणुयाद्वा द्विजेरितं || 18 ||

धनमायुर्यशो दीप्तं पुत्रान् शत्रुजयं तथा |
स पुष्टितुष्टी संप्राप्य स्कंदसालोक्यमाप्नुयात् || 19 ||

इति श्रीमन्महाभारते अरण्यपर्वणि त्रयस्त्रिंशदधिकद्विशततमोऽध्याये स्कंद स्तोत्रं |